CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सिद्ध लक्ष्यारि

प्रकाशक :
पब्लिकेशंस ब्यूरो
सूचना विभाग, उत्तर प्रदेश

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

२४६९

प्रास्ताविकम्

आस्वातन्त्र्यात्, इदानींतन राज्यशासनेन न केवलं राष्ट्रस्याशेषाःआवश्यकताः पूरयितुं सुनियोजिते योजने एव प्रस्तुते अपितु तासां साफल्यमपि विचारितम् कार्यान्वितीकृतं च। भवेत्वेषा कृषिः, जनस्वास्थ्यम्, औद्योगीकरणम् वा सर्वतोदिशि तेनाविश्रमितमनवरतं चप्रयतितम्। राष्ट्रोत्थानयज्ञस्ययावत्पूर्णाहुतिर्न भवति तावत्तस्यकुतो विश्रामः ?

अनाक्राम्य जगत्सर्वं नो संध्यां भजते रविः।

आगन्तुकेषु पृष्ठेषु तस्य सुमहतः प्रयासस्य किंचिद्दिग्दर्शन मात्रं समुपस्थितम्। सिद्ध तथ्यैः साफल्यमस्य भवन्तः स्वयमेव निर्णयन्तु।



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

फ
२६२
८०

कृषकाः, कृषिकर्माणि, भूमयः पशुधनानि च

यदा विश्ववन्द्यः राष्ट्रजनकः गान्धिः देशस्यास्य राष्ट्रपतिपद मलङ्कर्तुं कृषकस्यैवावश्यकतामुदघोषत्, तदा तेन रूढ़कृषकवर्गेष्वेव संकेतितमासीत्। अद्यापि भारतवर्षः कृषि प्रधानप्रदेशः। अतएवास्य पंचवार्षिकी योजनासु कृत करिष्यमाणकार्येषुच कृषिसाधनानामेव प्राधान्य मभ्यधायि, यथा तेषां सर्वतो भद्रं भवेत्।

अति वहुल संख्यके देशेऽत्र कृषिभूमिविस्तारस्य तु नास्ति संभावना यद्यस्त्यपि कुत्रापि ततः पर्वतार्धः प्रदेशं विहाय (तराई) नान्यत्रभागे भूमिप्रस्तरणस्य प्रश्नः समेधते। अपि च यावत्यो भूमयः कृषि कर्माही आसन् तासामप्यसमानविभागेन राष्ट्रस्यावश्यकता न पूरितं शक्ता।

१९५२ ईस्वीये जमींदारीप्रथोन्मूलनेनास्यमार्गस्य सुमहाना यासोऽपगतः। तेनोपलब्धधनानामुपयोगोऽपि कृषकाणां कल्याणार्थ-मेव नियुज्यते। ग्रामेषु भूमिकर्षणे स्वेच्छाचारस्थाने चक्रवन्धव्यवस्थया (चकबन्दी) सहैवास्याः, राष्ट्रोन्नतियात्रायाः द्वितीयः खंडः समारब्धः, अद्यावधि, एकविंशतिमंडलेषु चक्रवन्धं प्रसारितम् सपद्येव अन्येष्वपि मंडलेषु, एषः प्रसरिष्यते। इमां पद्धतिं यदि मात्सर्यमुत्सार्य विचारयामः तदा तस्याः जनसाधारणस्य प्रत्येकावश्यकतापूर्तये देवालय, पुस्तकालय, क्रीडाक्षेत्रादीनां सर्वेषामपि सुप्रबन्धः समावेशश्च स्पष्टतयावलोक्यते।

शासनभारग्रहणानन्तरं लोकशासनसमक्षे प्राथमिकीसुकठिन। समस्या खाद्यान्नस्यासीत्। अतएव प्रथमपंचवार्षिकीयोजनायां स्वाभा-विक्यासीदस्याः प्रथमता। अस्यां सुप्रभूता सफलता च लब्धा। अद्य नास्ति विदेशेभ्यो, अन्नक्रयणस्यावश्यकता यद् वयं स्वयमेव प्रभवः ऽन्नस्थितेः। इदानीं न केवलं वयं स्वावश्यकतापूर्तये समर्था अपितु प्रतिवेशिकेभ्योऽपि राज्येभ्यः साहाय्यदानं कुर्मः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अपि च स्वातंत्र्यात् प्राक् नासीदनुर्वरा भूमि र्नचभारतीयाः स्फूर्ति-हीनाः रुचिहीनाः वान्नोत्पादने किन्तु साहाय्यसौविध्याभावे परिमितसाधनेषु च व्यर्थीभूतासीत् तेषां योग्यता।

साहाय्येषु सिञ्चनसुविधानां स्थानस्तु प्रथमः

१९४६ ईस्वीयतः प्राक् यानि कानिचित् राजकीयसिंचनसाधनान्यासंस्थानि पश्चिममध्यभागयोरेवस्थितान्यासन्। वस्तुतस्तु न पर्याप्त साधनान्युपलब्धान्यासन्नैवच किमपि मार्गदर्शनं विहितमासीत्। परिवर्तिते राज्यशासने जनशासनेन सिंचनसुविधाभिर्वञ्चितेषु क्षेत्रेषु सर्वापेक्षया पूर्वंदृष्टिरकारि। अस्य सुविशाल प्रयत्नस्य यत्किंचिदाभासः निम्नांकितपंक्तिभिरवधीयते।

जलबन्धाः जलाशयाश्च

उत्तरप्रदेशे सन्ति कियन्तो भूभागा एतादृशाः यत्र साधारणोपलब्ध सिंचनसाधनैर्नलकूपादिभिर्नास्ति सिंचनसुविधा संभवा, यतस्तत्र प्रस्तर-प्रधानाभूमयोऽन्या वा ईदृशावरोधाः। किन्त्वेतेषु प्रदेशेषु प्रायशो क्षुद्रनद्या उपलब्धाः याः वर्षाकालेषुविपुलजल पूरिता भवन्ति। परन्तु तदा मेघा एव पर्याप्ताः। ग्रीष्मे यदा सिंचनाय जलानामावश्यकत्वम् तदा एता शुष्यन्ति। ईदृशेषु क्षेत्रेषु एकमात्रजलाशयै रेवावसेकः सम्भवः। विषयेऽस्मिन् ये बन्धाः, अद्यावधिजलावरोधनाय बद्धाः किम्वा बद्धप्रायाः तेषा यत्किंचिदोल्लेखनमधः क्रियते।

ललितपुर बन्धः—११,००० फुट आयतनो ६० फुट उन्नतोऽयं बन्धोऽस्य क्षेत्रस्य ४३,००० एकड़ भूमीः सिंचति। अस्य निर्माणे प्रायश-श्चतुष्पंचाशत् लक्षरुप्यकाणां व्ययोऽभूत्। अपरोबन्धः "सपरारः" अपि पूर्णप्रायोऽस्ति। अनेन सिंचनमपि प्रारब्धम्। अस्मिन् ५५ पंचपंचाशत् फुट उन्नते बन्धे त्रिंशद् गव्यूति (१२० मील) क्षेत्रे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

फ
३६२

विस्तृतायाः नद्याः २४,००० घनफुट जलानां राशि रेकत्रीभवति। येन च झांसी-हमीरपुर क्षेत्रयोः प्रायशः ३२,००० एकड़ भूमयः सिंचयन्ते।

माताटीला—तृतीयो माताटीलायाः महत्वपूर्णोबन्धः, यस्य प्रथम चरण कार्यमस्मिन्नेव वर्षे पूर्तिंगमिष्यति। गते च पूर्णेऽस्योत्तर भागस्थित झांसी-जालौन मंडलयोः २,०२,२०० एकड़ भूमिमथच मध्यप्रदेश-विन्ध्य-प्रदेशयोः ६२,३०० एकड़ भूमीनामपि सिंचनं भविष्यति।

अपि च हमीरपुर मंडले योऽर्जुन वन्धः मृदावद्धः कवरई बन्धश्च उभयोर्जलेन प्रायशः ३२,००० एकड़भूमयः सेक्ष्यन्ते।

रंगवावन्धः—बांदा मंडलान्तर्गतभूमि सिंचनाय केन नदी सहायिकायाः "वन्ने" नद्या बन्धः पूर्तिंगतः। अस्य जलेन ९३,००० एकड़ अपरा भूमयः सिंच्यन्ते।

वेलन-टोंस नहर योजना—वेलन-टोंस गंगानदीनां जलेषु प्रयाग मंडले १०१.४७७ एकड़ भूमयः सेक्ष्यन्ते सिंच्यन्ते च।

एतदतिरिक्तम्—अहरौरा-चन्द्रप्रभा-नौगढ़स्थानां विशालबन्धानां निर्मितिरभूत्। एते बन्धा मिर्जापुर वाराणसी मण्डलान्तर्गताः सन्ति।

कुल्यानि (नहरें)

बन्धातिरिक्तानि कुल्यान्यपि वहूनि प्रथम पंचवार्षिकीयोजनायां निर्मितानि। वहूनां प्राचीन कुल्यानां विस्तारोऽप्यभूत्। एतेषु शारदानहर प्रणालीविस्तारः वाणगंगानहरम्, शाहगंजरजबहा,घांघरागरईत्यादयः, दोहरीघाट पम्पनहराणि, टांडापम्पनहराणि, नारायणी-गंडक पोखरा नहराणि चमुख्यानि सन्ति।

अपि च यत्र प्रस्तर प्रधान भूमित्वादन्य कारण वशाद्वा नास्ति कुल्यकादिसाधनैः सिंचन संभवस्तत्रासंख्य नलकूपैःक्षेत्राणि सिंच्यन्ते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विद्युद्योजना

जलावश्यकतापूर्तयेऽन्यकार्याणां च विकासाय तैः सह विद्युच्छक्तेरस्ति सुमहान् सम्बन्धः, हि नलकूपादीनां विद्युदाधीनमेव व्यवस्था समागमिष्यति काले कुटीरोद्योगेष्वपि विद्युदावश्यकता भविष्यति साम्प्रतं तु नलकूपा एव प्रथमतां भजन्ते। १९५४ ईस्वीय पर्यंतं—हाइड्रो-थरमल, डीजिल प्रभृति नामधेयानां विद्युद्गृहाणां संख्याऽत्र द्वात्रिंशदासत् (३२)। अपिचैतदतिरिक्तानि ३७०८ उपविद्युद्गृहाण्यासन्। एतेषामेव साहाय्येन १९५५ ईस्वीयपर्यन्तम् ३९९९ नलकूपाः निर्मिताः। साम्प्रतं कृषि-कर्मणि कोटीनाम् दश लक्षाणामशीति च (१० करोड़ ८० लाख यूनिट) यूनिटपर्यन्तम् विद्युद्व्ययो भवति।

अद्यावधि, मोहम्मदपुर, गोरखपुर, सोहावल, पथरी, खटीमा प्रभृतिषु स्थानेषु विद्युद्गृहनिर्माण कार्यं समाप्तप्रायम्। राजकीयनलकूपेभ्यः (९९५) अष्ट डिजिल स्टेशन द्वारा विद्युच्छक्तिर्दीयते। गंगा टोंस ट्रांस्मिशन पंक्तौ ६६ के-वी० पंक्तेः कार्यं पूर्तिमगात्। पर्वतीय मंडलेष्वपि च विद्युत्योजना समाप्तप्राया।

द्वितीयपंचवार्षिकीयोजनायां १५०० नलकूपेभ्यो विद्युद्दानं राज्य लक्ष्यम्। रामगंगा, हरदुआगंज, गंगा ट्रांस्मिशनलाइन यमुना जलविद्युत् गृह बुन्देलखंड ट्रांस्मिशनलाइनादि स्थानेषु नगरेष्वपि च विद्युत् सौलभ्यं भविष्यति। प्रथमपंचवार्षिको योजनावशिष्टान्यन्यान्यपि एतत्सम्बन्धीनि कार्याणि पूर्तिं गमिष्यन्ति।

अन्नबीजम्

सिंचनव्यवस्थान्तरं उत्तमबीजानां तेषां सुवर्धनाय परिवर्धकानां (खाद) समुन्नत कृषियन्त्राणां चावश्यकत्वमासीत्। इदं कार्यमुत्तर प्रदेशे राजकीयबीजालयैः सम्पन्नम्। एषां सहायिकाः सहकृति समित्योऽभ्यासन्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अ
३६२

पूर्णप्रदेशस्यावश्यकता पूर्तये ४,००,००,०००] चतुष्कोटि मन बीज-स्यावश्यकता प्रतिवर्षं भवति। योजनारम्भे प्रथमश्रेणि बीजस्य नासीत्प-र्याप्ताराशिः। अतएव प्रथमयोजनाकाले बीजवितरण कार्याणि त्रिषुचरणेषु विभज्य अर्धप्रदर्शन चकबीजोप्ति-पूर्णबीजोप्ति क्रमणे लक्ष्यं लब्धम्। तदनन्तरम् बीजगृह संख्यावृद्धिं गता। १९४८ ईस्वीये केवलं ५६७ बीजागाराण्यासन् परन्तु १२५५ ईस्वीयं यावत् १२०० बीजागाराण्य भूवन्। प्रतिवर्षं च (१००) शतबीजगृहानुपातेन, इमाःवर्धन्ते।

उर्वरकाः कृषियन्त्राणि च

अस्त्युर्वरकरणां कृषियंत्राणां च विकासाय प्राचुर्याय च प्रभूततरं प्रयत्नं विहितम्। अद्यावधि १६६६५ टन रासायनिकोर्वरनानि ग्रामेषु वितरितानि। कृषिकर्मयंत्राण्यपि काले-काले बहुसंख्यकानि ग्रामीणैर्नीतानि।

पशवः

उपरोक्तवस्तुभिः सहैव श्रेष्ठ पशूनामावश्यकत्वमनिवार्यम्। एतेषा वर्गसुधारं बिना कृषिसफलता नास्ति संभवा। तेषा चिकित्सार्थं सुविधा च परमावश्यकी। प्रथम योजनायामनेन कार्येण अतिप्रमुखत्वं लब्धम्। प्रथमतः राज्येन वैक्सीनोत्पादनगृहाणां वृद्धिः कृता। एकविं-शतिलक्षस्थाने तेषां संख्याधुना ११७ लक्षं प्रापिता। व्यापकानां पशु-रोगाणामवरोधार्थं च प्रत्येकः संभवः प्रयत्नोऽभ्यधायि। अवशिष्ट कार्याणि तु द्वितीययोजनायां पूर्ति गमिष्यन्ति। पशूनां कोटेसमुन्नत्यै विशेषेण पश्चिमस्थमंडलेषु बलियामंडले च प्रयत्नोऽकारि अग्रे इत एवस्थाना दन्यमंडलेषु बीजवृषभाः प्रेषिष्यन्ते। दुग्धदातॄणां पशूनां दशा तु सर्वाधिक शोचनीयासीत्। योजनाकालेऽस्मिन्नपि विषये विशेषेण विचारितम्। प्रथमं तु एतदर्थं गोवधनिवारणमतीवाश्यकमासीत्। एतदर्थं राज्ये शासकैः गोहत्यासु विशेषप्रतिबन्धोऽकारि। पंचायतान्यपि गोचराणां क्षेत्रपरिणतिं न्यषेधन्। कृषिपशवो मानवेतराः प्रधान सहायकाः, गावो महिष्यादयश्च दुग्धघृतानामावश्यकता पूरयन्ति। तासां दैहिकोत्सर्गाः क्षेत्रोर्वरकाः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शरीरान्ते चर्माण्युपयोगीनि। अतो यदि पशुपालनाय तेषां जात्युन्नत्यै वा कृषकवर्गाः प्रोत्साहिता न भवेयुस्तदा वास्तविका समुन्नतिः, असम्भवा एव। प्रथमं पर्याप्तदुग्धादिप्राप्त्यसंभवा एवासीत्। अधुना तु इदं सर्वसाधारणसुलभम्। अपि च राज्योऽजा कुक्कुट मत्स्यसूकरादिपालनं च प्रोत्साहयति। जनेषु योजनायामुत्साहो प्रतिदिनं वर्धते एव, हि इमानि तेषामार्थिकस्थितिं सुदृढयन्ति अपिच एतदर्थं पर्याप्तराज्यसाहाय्यमपि सुलभम्। समये-समये चावश्यकः निर्देशोऽपि क्रियते। यथा समुचित विकासायानुभूतमेव निर्दिष्टव्यम् अतः राज्येन स्वपरीक्षणकेन्द्रं स्थापितम् तत्रकृतपरीक्षणाधारेणैवाऽन्येभ्योऽपि सूचना दीयते।

यदा-कदा पशूनां महामार्यः ग्रामक्षेत्रेषु प्रसरन्ति तदासंख्यधनजन हानिर्जायते। तेषां चिकित्सायै प्रायशः सर्वेषु केन्द्रेषु पशुचिकित्सालयान्युद्घाटितानि राज्येन। एतेषां मार्गदर्शने कृषकाः पशुधनानि सारल्येन पालयन्ति वर्धयन्ति च। विदेशेभ्योऽपि विशिष्ट जाति पशूनानीय तेषां पालनाय जाति वर्द्धनाय च स्वदेशे यत्नः क्रियते। एतदर्थं वैज्ञानिकप्रक्रियाः आलभ्यन्ते। स्वातंत्र्यात्पूर्वम् यादृशः पशुक्षयोऽवर्धत् स एव क्रमो यदि चेत् अद्यापि स्यात्, तदा न जानीमो देशस्य का दशा, इदानीं भवेत्।

विशुद्धजातीयानां पशूनां वर्द्धनाय प्रदेशे द्वे पशुप्रजननकेन्द्रे स्थापिते। साम्प्रतम् प्रदेशे शुद्ध जातीयाः ६१५६ गवेन्द्राः सन्ति। ६५ कृत्रिम गर्भाधानकेन्द्राण्यपि कार्यं कुर्वन्ति। एतेषु ३७,२१२ प्रयोगाः सफलाः, अभवन्। प्रदेशे पशुचिकित्सालयानां संख्या २७१ अस्ति। योग्यकार्यकर्तृणामभावः कार्येऽस्मिन् प्रवाधकः, आसीत्, किन्तु इदानीं राज्यशासनेन पशुचिकित्सकानां शिक्षणाय मथुरायां केन्द्रमेकं स्थापितम्।

भूमिसुरक्षणम्

जमींदारीप्रथोन्मूलनचक्रबन्धाद्यतिरिक्तं भूमिकर्तनरक्षणाय तत्र-तत्र नलिकासु बन्धोऽपि बद्धः। भूमि-प्रबन्ध-समिति विभागः कुल्यानां, रक्षणम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वनरोपणाय २४,४७१ एकड़ विस्तृतवनानाम् १,१०५ मीलपर्यन्तम् विस्तृत राजमार्गेषुस्थितवृक्षाणां च रक्षां विदधाति । भूमिसुधाराय, तत्र-तत्र स्थानेषु वृक्षारोपणाय चायमेव विभागो यतते । राजस्थानाद्वर्धमानायाः मरुस्थल्या-वरोधनार्थं वृक्षारोपणस्यावश्यकत्वमनुभूय अनेनैव प्रयतितम् । प्रोत्साहिताः अस्य क्षेत्रस्य कृषकाः अपि पूर्णसहयोगमकुर्वन् । परिणामस्वरूपं सुदूरवृक्षपंक्ति तेहि आरोपिता आरोप्यन्ते च बहवः । अद्यावधि, अस्मिन्क्षेत्रे षोडशलक्षवृक्षा युवप्रायाः ।

मरुस्थलावरोधातिरिक्तं, वनोच्छेदावरोधं, तेषां रक्षणं वर्धनं च अयमेव विभागः करोति । पार्वत्यक्षेत्रेषु नूतनानि श्रेष्ठानि च फलान्यु-त्पाद्यन्ते । पाटम्बरकीटानां वृद्धिविकासयोः यत्नः क्रियते फलव्या-पारवर्धनाय पर्वतीयप्रांतेषु विशेषेण सहकृत समितयः स्थापिताः परि-णामस्वरूपं मधूत्पत्तिः गतवर्षे प्रभूततराजायत । वनौषधीनां मुत्पादनाय परीक्षणाय च नैनीताले, अल्मोड़ामंडले चानुसन्धानशाला प्रयोगकक्षंचोद्घाटितम् । अस्यां दिशि विकासायानुसंधानाय च पर्याप्तक्षेत्रं ।

आरामाणं विकासायापि विविधाः कार्ययोजनाः प्रयुक्ताः । पर्वतीय-क्षेत्रेषु १,४४,१६० वृक्षाः समारोपिताः । अपि च तत्रत्यौषधगृहेभ्यः ८४,४२३ पुष्टांकुरिता वृक्षाः वितरिताः फलवृक्षसुरक्षासचलदलानिच संस्थापितानि सन्ति । तेभिः १,०९,३१० एकड़ भूमयः प्रस्तुतीकृताः । १९५३–५४ ईस्वीयं यावत् १६,८०० एकड़भूमिषु प्राचीनोद्यानानां जीर्णोद्धारोऽभूत् । अपि च १३,७०० एकड़भूमिषु नूतनारामाः आरोपिताः । देशे विभक्ते सति जूटोत्पादकानि क्षेत्राणि पाकिस्तानभागे यंत्रालयाश्च, अस्माकं भागे निपतिताः । अतएव जूटोत्पादनमनिवार्यमजायत । अस्मिन्क्षेत्रे गतवर्षे विशेषः प्रयत्नोऽभूत् । फलस्वरूपं १९४८ ईस्वीये यदा केवलं ८,००० एकड़ भूमिष्वेवास्योत्पत्तिरभूत्, इदानीं ५०,००० एकड़भूमयः जूटमुत्पादयन्ति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृषिकार्यशिक्षणाय कर्णपुरे (कानपुर) शिक्षालयोऽस्ति। यस्मिन्, ३११, स्नातकाः साम्प्रतं शिक्षिताःक्रियन्ते। अपरं च कृषिशिक्षार्थं त्रयोऽपराः अपि माध्यमिकविद्यालयाः यत्र वर्तमानछात्रसंख्या-३६७ अस्ति।

एषां प्रयत्नानां स्पष्टप्रभावः अन्नायाते परिलक्ष्यते इतः प्राक्-वयमन्यदेशानामाश्रितारासन् किन्नुइदानीं न केवलं वयं स्वस्थितेरेव प्रभवोऽपितु प्रतिवेशिकानामपि साहाय्ये समर्थाः।

पञ्चायतानि

कृषकाणां स्वतन्त्रविकासः, स्वसमस्यानां निराकरणं च तेषांमात्म-निर्भरतायामेव व्यवस्थितिरस्तु, इति प्रागेव सिद्धान्तितमासीत। पञ्चा-यतराज्य स्थापनायाः अयमेवोद्देश्यः। एतदर्थमेव स्वतन्त्रतया सहैव ग्रामे-षुपञ्चायतानि स्थापितानि। अनेन कृषकेषु, अभिनवविश्वासः सर्जितः। इदानीं ते स्वविवादनिराकरणाय समुत्सुकाश्चाभवन्। एतेषां पञ्चायताना-मावश्यकत्वं महत्त्वं च जमींदारी प्रथोन्मूलन पश्चादेव पूर्णतयानुभूतम्। यतः, सामूहिकाधिकारः, एषां पञ्चायतानां माध्यमेन मूलतः कृषकेष्वेव न्यवर्तत। पंचन्यायालयानां स्थापनया तेभ्यः स्वविवादनिर्णयार्थं सरलः सुगमश्च पन्था लब्धः। अपिचअल्पात्यल्प विवादेषु निर्णयार्थंन्यायालयगमनं व्ययं चावरुद्धम्। अस्य माध्यमस्य महत्त्वं विगत पञ्चायतनिर्वाचनेषु सर्वैरेवानुभूतम्। प्रदेशे प्रायः जनानां कोटिद्वयम् निर्वाचने सम्मिलितमभूत्। स्वानुकूलांश्च सदस्यानचिन्वन्। ७२,४२४ निर्वाचनेषु ५९,४९७ विवादिताः, शेषाः, निर्विरोधेन सिद्धारभूवन्।

अद्याशेषे प्रदेशे ३६,१३९ ग्रामसभाः, ८,५४३ न्याय पञ्चायतानि च सन्ति। पञ्चायतेषु निर्वाचितानां परिगणितजातीयसदस्यानां संख्या-धिक्येन ग्रामेषूत्कृष्टापकृष्टजाति भेद-राहित्यमनुमीयते निश्चीयते च। पञ्चायतन्यायालयैः १८,४१,२९७ अभियोगाः निर्णीताः, अपि च ६,२९,८२७ अभियोगेषु परस्परं सन्धिः कारिता।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पंचायतराज नवयुगारम्भः—अस्तिपञ्चायतराज्यस्थापना भारतीय कृषकाणां जीवनस्य सर्वाधिकाक्रान्तकारिणी घटना। भारतीय कृषकाणां परस्परविरोधः दैन्यस्य प्रमुखम् कारणमासीत। अतिसाधारणविवाद निर्णयायापि दूरतरन्यायालयेषु धावनम् निर्णयावधि तत्रासंख्यधनानां श्रमस्य च व्ययमतीव पीडाकरमासीत्। इदानीमभियोगानां पादत्रयं पञ्चायतेष्वेव निर्णीयते विलम्बश्च न भवति। बहवो विवादा इतरेतरेषु सन्धिद्वारेणैव विलीयन्ते मनोमालिन्यं च न वर्धते। भारतीय कृषकाणां जीवने सुखशान्तिवर्द्धनाय व्यवस्थेयमतीव सहायिका सिद्धाभूत्। पञ्चायतानि न केवलं न्यायालयानि अपित्वन्यापि भारं वहन्ति। तेषां ग्रामसभा ग्रामविकाससम्बन्धिकार्यक्रमं पूरयन्ति। ग्रामेषु स्वच्छता प्रबन्धः जनेषु शिक्षाप्रसाराय रात्रिपाठशालास्थापनम्, नवीनतमसमाचार बोधनार्थं ग्रामपुस्तकालय संगठनम् आकाशवाणीध्वनियन्त्रव्यवस्थापनं स्वास्थ्यसुधाराय व्यायामशालायाश्च प्रबन्धः ग्रामसभायाः एव कर्तव्यानि। एतदतिरिक्तम् नवनिर्माणयोजनासु पञ्चायतेनानेकानि प्रशंसास्पदानि कार्याणिकृतानि। योजनामध्ये पञ्चायतैः ८,९८३ पञ्चायतगृहाणि, ११,१९४ गांधिचबूतरा, २१,७८१ मीलपर्यन्तम् नूतन राजमार्गाः, १२,७०८ पुस्तकालयानि, ८०,००० प्रकाशदीपकाः, ४,००० आकाशवाणी ध्वनियन्त्राणि च ग्रामेष्वायोजितानि।

समाजकल्याणम्

इदानीं समाजकल्याणं प्रति विशेषोद्योगोऽतीवावश्यकः। अधिकांशेऽस्यांदिशि कार्याणि परिगणित जातीय जनेष्वेव कृतानि। नारीणां बालकानां चोन्नतिविकास हेतवेऽधिकाधिक जागरुकता प्रयुक्ता। तेभ्योऽधिकं स्वातन्त्र्यं प्रदाय अवरोधप्रथापरिसमाप्त्यर्थं यत्नः क्रियते, येन तासामस्यास्थकथायाः परिसमाप्तिः स्यात्। अन्त्यजेभ्यः तेषामधिकार प्रदानव्यवस्थाऽपि पूर्णं प्राया। व्यवहारे चेयमस्पर्श्यव्यवस्था

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षमाप्तप्रायैर्वास्ति । एतेषां सर्वेषां कार्याणां श्रेय आयसमासंचा-
रकेभ्यां कृषकवर्गेभ्य एवाऽस्ति ।

सहकारिता

पूर्णस्वातन्त्र्यलाभं तु तावन्नाप्नोति यावद्राष्ट्रजनः स्वकीयार्थिक-
समस्यानां समाधानार्थं परस्परं न सहकुरुते । आयोजितानर्थव्यवस्थाम्
लोकतान्त्रिकरीत्यावर्तयितुं सहकारिताधिकारो ग्रामेषु शीघ्रं क्रियते ।

अद्योत्तर प्रदेशे १८,३७५ सहकृतसमितयः कार्यं कुर्वन्ति । आसु
संस्थासु प्रायशो लक्षत्रयादप्यधिकं धनं निहितमस्ति । कृषकेभ्यः, ऋण-
दातृसमितयः ३२,२९० संख्याकाः, ग्रामेष्वर्थव्यवस्थां संतुलयन्ति । मण्डलेषु
२९,६८५ बहुकार्य बंधी-समितयः स्थापिताः सन्ति, यासु, अनेकशानां संस्थानां
समाधानं एकत्र एव भवति । भारतीय कृषकाणां विषये प्रसिद्धमेवेदं
यदसौ ऋणे एवजायते तस्मिन्नेव परिसमाप्यते चेति । अस्य कारणं कुसीदा-
धिक्यमेवासीत् (व्याज) । एकदागृहीते ऋणे कृषकः कदाप्यनृणो नाभूत् ।
सहकृतऋणसमितिभिः, इत्थंभूतैः, ऋणैः कृषको मुक्तः । अपि चैताः समितयः
कृषिक्षेत्रेऽपि कृषकानां साहाय्यं कुर्वन्ति । तेभ्यः श्रेष्ठबीजदानमप्यस्या एव-
समितेः कार्यमस्ति । हलवृषभादीन् क्रेतुमपि कृषकेभ्यः, इमाःसमितयः,
ऋणं ददति । विद्यालयपुस्तकालयाद्यनेकसार्वजनीनसंस्थाभिः कृषकाणा-
मुन्नति अर्थं स्वलाभात् समित्यानयानुदीयते । कृषकाणामन्नानि
स्थापणेषु, आनीय तानि विक्रीय कृषकेभ्यः समुचितमूल्यदापनमपि
अस्या एव समितेः कार्यमस्ति । प्रदेशीय सहकारिसंघैरद्यावधि सार्ध-
कोटि मुद्रा मूल्यानि वस्तूनि विक्रीतानि । असंवेहं कुटीरोद्योगमाध्यमेन
सहकृतसमितयः ग्राम्यजीवनं स्वर्गेण तुलयितुं प्रभविष्यन्ति । सहकारिता-
वलम्बिनं राष्ट्रं कोऽपि मुद्रुःसहबलोऽपि राष्ट्रः पराभवितुं न शक्नोति ।
अ भारतीयकृषकः कदाचिदस्याः, एव शक्तेर्बलेनापराजेय आसीत्, अद्य-
भूवस्तस्यामेव दिशि दार्ढ्येन समुपसरति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रमकल्याणम्

लब्धस्वातन्त्र्ये सति, अन्ताराष्ट्रियव्यापारे हीनतमस्थितस्य भारतवर्षस्योद्योगीकरणं तात्कालिकावश्यकमासीत्, ह्यस्माकं जनसंख्याधिकांशे भूम्याश्रिताएवासीत् । किन्त्वनवरत वर्द्धमानाया जनसंख्याया भरणपोषणं कर्तुं केवला कृषि असमर्था रेव विगतवर्षेषु, उद्योगानामौद्योगिक क्षेत्राणां च विकासाय राज्येन पर्याप्तं प्रयतितम्, संतोषप्रदा सफलता च लब्धा । किन्तु प्रतिवेशिकानामिव, अस्मिन्नपि देशे उद्योगानां स्थापनया सहैव श्रमिकाणां कल्याणव्यवस्थापि समयासहानिवार्या चाभूत् । पूर्वं यन्त्रालयाणां व्यवस्था व्यक्तिगतार्थिकलाभाय एवाभूत् । श्रमिकेभ्योऽधिकाधिकं श्रमंप्रगृह्य न्यूनान्यूनतरं पारिश्रमिकमेव लक्ष्यमासीत् । ते जीवननिर्वाहयोग्यमपि पारिश्रमिकं नालभन् । परिणामस्वरूपं तेषां मस्वास्थे, उपचारार्थमपि द्रव्यंसुलभमासीत्, निवासगृहाण्येव व्यविवस्थातानि उद्योगपतीनां नासीत्कोप्युत्तरदायित्वम् । कावार्ता मनोरंजनाय ज्ञानवर्धनाय वा सौविध्यस्य कठिन परिश्रमान्तरं । कार्यं कुर्वतस्ते यदि क्षतविक्षता भवेयुः, नहि यदि मृत्युमपि प्राप्नुयुस्तदापि नासीत् सम्बन्धिनां क्षतिपूर्त्याशा । उद्योगपतिःकस्मिन्नपि समये तान् पृथक्कर्तुं प्रभुरासीत् । उत्तरप्रदेशोऽपि नाभवावस्वरूप : ।

उपरोक्तपरिस्थितिषु श्रमिकाणामसन्तोषः स्वाभाविकोऽभूत् । पूर्णार्थिकविकासाय तेषां संतोषस्त्वनिवार्यः । स्वातन्त्र्यान्तरं यत् राष्ट्रविधानं निर्मितमभूत् तस्मिन् श्रमविधाननिर्माणाधिकारः केन्द्रीय-प्रान्तीयोरभयोरपि शासनयोःरभूत् । उत्तरप्रदेशे श्रमिकेभ्यो लब्धानेकसुविधाः महत्वपूर्णकेन्द्रीयाधिनियमेष्वाधारिताः । तथापि यत्रावश्यकताभूत्तत्र प्रान्तीयशासनेनापि निर्मीयते ।

संबंधेस्मिन् केन्द्रीयशासनेन १९४८ ईस्वीये पारितः मन्त्रालयाधिनियमो महत्त्वपूर्णः । अस्मान्नियमात् कोऽपि यन्त्राधिपतिः श्रमिकेभ्यः पारिश्रमिकं विना कार्यग्रहणेऽसमर्थः, अतिरिक्तकार्यार्थमिदानीं ते सामान्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पारिश्रमिकादिद्विगुणं दातुं विवशाः। साप्ताहिकावकाशानां किंवार्जितावकाशानां च व्यवस्थावश्यिकी। सम्बन्धेऽस्मिन्यंत्रालयनियोजन विधानः पर्याप्तसाहाय्यं कुरुते। एवमेव केन्द्रीय बालनियोजनविधानं उत्तर प्रदेशेनापि कार्यान्वितीकृत्य बालश्रमिकेभ्यः कार्यग्रहणोपरि पर्याप्तावरोधः स्थापितः। श्रमिकवर्गेण सह कोऽप्यन्यायाचरितो न भवेदेतदर्थमौद्योगिकविवादाधिनियमान्तर्गता राज्येन विवादादिवारणाय व्यवस्था कृता। १९४६ ईस्वीतः पूर्वं केवलमेकैव "कंसीलियेशनाधिकारी" संपूर्णप्रदेशे, आसीत्, किन्त्वौद्योगिकमहत्त्वस्य तत्संबंधिकार्याणां च विस्तारादधिकारिणां संख्या वृद्धिरप्यनिवार्याऽभूत्। साम्प्रतम् राज्ये २२ संराधनाधिकारिणः सन्ति (कंसीलियेशन आफीसर)। समस्तप्रदेशार्थमौद्योगिकन्यायाधिकरणस्यापिस्थापना कृता। इदानीं कस्मिन्नपि विवादे समुपस्थिते सति, उभयोरपिपक्षयोर्वृत्तं श्रुत्वैवोपयुक्ताधिकारी निर्णयं ददाति।

१९४८ ईस्वीयस्य न्यूनतमवेतनाधिनियमेन प्रदेशस्यानेकेषु प्रमुखोद्योगेषु श्रमिकाणां पारिश्रमिकम् निश्चितम्। श्रमिकक्षतिपूर्त्यधिनियमेन श्रमिकेभ्यः क्षतिपूर्त्यधिकारोऽपि प्रदत्तः। सम्प्रति श्रमजीवीपत्रकाराधिनियम द्वारा (१९५५) १९४७ औद्योगिकविवादाधिनियम श्रमजीवीपत्रकारेष्वप्यधिकृतः।

एतदतिरिक्तं श्रमजीविहितसाधनकामेन राज्येनापराण्यप्यनेकानि कार्याणि विहितानि। अस्मिन् संबंधे श्रमकल्याणकेन्द्राणां स्थापना विशेषेण प्रशंसनीया। एतेषु केन्द्रेषु स्वास्थ्यवर्धनमनोरञ्जनक्रीड़ादीनां सुव्यवस्था। १९३२ ईस्वीये श्रमकल्याणकार्यस्य प्रारम्भोः लघुरूपेणाभूत्। तस्मिन समये कर्णपुरे (कानपुर) केवलं चत्वारि श्रमकल्याणकेन्द्राणि स्थापितान्याभुवन। एभिः केन्द्रैः श्रमिकाणामपरिमितो लाभोऽभूत्। अतएव तेषां लोकप्रियता प्रवृद्धा। १९५५ यावत् पूर्णप्रदेशे, एतादृशकेन्द्राणां संख्या चतुश्चत्वारिशज्जाता, तथा च राज्येन अष्टलक्षरुप्यकाणि व्ययीकर्तुं निश्चितीकृतम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

'अ' श्रेण्यन्तर्गते प्रतिकल्याणकेन्द्रे, एकमैलोपैथिकौषधालयम्, महिलाशिशुविभागः, सूचीकार्यं विभागः, अन्तर्वहिः क्रीडाविभागः, मल्लशाला, क्रीडाक्षेत्रम्, वाचनालयपुस्तकालय मनोरञ्जनसाधनानि संगीतप्रबन्धश्चास्ति। एवमेव 'ब', 'स' श्रेणीनां श्रमकल्याणकेन्द्राण्यपि भवन्ति। एषु च ऐलोपैथिकौषधालयं विहाय प्रायशोऽन्यासुविधाः 'अ' श्रेणी समानाः। चायवाटिकानां शर्करोद्योगानां च कार्यकर्तॄणां पृथक्केन्द्राण्युद्घाटितानि।

राज्येन श्रमिकार्थं वीमा-प्राविडेण्डफण्डविभागयोरपि व्यवस्था कृता। अनेनैवोद्देश्येन केन्द्रीयशासनेन निर्मितः, कर्मचारी-राज्य-वीमाऽधिनियमः—प्राविडेण्डफन्डाधिनियमश्च प्रान्तीयराज्येणाप्यधिकृतः। एषु क्षेत्रेष्वयं नियमोऽधिवर्तते तत्र येभिः कर्मचारिभिःश्चतुःशतानि ततो न्यूनानि वा रुप्यकाणि लभ्यन्ते तेषां जीवनवीमावश्यकः। एवमेव श्रमिकेभ्यः प्राविडेण्डफण्ड सुविधाप्युपलब्धाऽस्ति। श्रमिकार्थं राज्येन गृहाणामपि व्यवस्थाकृता। गृहनिर्माणसम्बन्धे द्वे योजने देशे प्रचलतः। प्रथमा राज्यस्य शर्करोद्योगेषु द्वितीया च केन्द्रशासनेन लब्धसाहाय्या, योजना औद्योगिकावासयोजनान्तर्गता प्रचलति।

संक्षेपेण श्रमिकानां हिताय गतेषु षट्सु सप्तवर्षेसु राज्येन अनवरतं प्रयतितम्। यद्यपि क्षेत्रेऽस्मिन् प्रागपि प्रयत्नान्यभूवन् किन्तु विचारार्हमिदं यत्केवलं विधाननिर्माणमात्रेण कस्यापि वर्गस्य कल्याणलाभो न सुशकः। विधान निर्माणेन श्रमिकेभ्यो महत्त्वपूर्णाधिकारदानं तु कर्तुं शक्यते किन्तु यावत्, तेषां शैक्षणिक, मानसिक, सांस्कृतिक, आर्थिको, नैतिकश्च विकासो न भवति तावन्नतु ते स्वाधिकाराणामुपयोगे एवक्षमाः, नहि च तेषां रक्षणाय समर्थाः। अनेन दृष्टिकोणेन उत्तर प्रदेशीय शासनेन श्रमकल्याणकेन्द्राणां स्थापनाभिनवः प्रयोगः। आशास्महे यदागामि वर्षेषु श्रमिक वर्गेभ्यो ऽपराः, अधिकाश्च सुविधाः सुलभाः, भविष्यन्ति तेऽपि च प्रभूततरेणोत्साहेन स्वराष्ट्रनिर्माणकार्ये दत्तचित्ता भविष्यन्ति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जन-स्वास्थ्यम्

प्रगतिकामस्य राष्ट्रस्य स्वनागरिकाणां स्वास्थ्यसाधनं कर्तव्येषु प्रमुखम्। सबलीकृताः, स्वस्थाः नागरिका एव उन्नतिपरस्य, अथ च वर्धमानस्य राष्ट्रस्य भारं वोढुं, किञ्चोत्तरोत्तरमग्रे नेतुं प्रभवन्ति।

प्रथमपञ्चवार्षिकीयोजनाया राज्य शासनोऽस्यां दिशि विशेषेण सप्रयत्नोऽभूत्। परं यासु विषमासु स्थितपरिस्थितिषु, परिमित साधनेषु चास्माभिः, आरम्भः कृतः तस्मिन् कार्याधिक सम्भावना नासीत्। प्रति नागरिकं पूर्णचिकित्सोपलब्धि, स्वास्थ्यसंवर्धनं च सम्पादनम् न सुकरं। किन्तु द्वितीय योजनायामवश्यमेव पूर्णलक्ष्याः, भविष्यामः, इत्याशास्महे। परं जनसहयोगमपि उद्देश्याधिगमे परमवांछनीयम्।

पौष्टिकाहारस्तु मानवजीवनाधारेषु प्रथमः। तदभावे शिथिलाः, विविधरोगग्रस्ताः जनाः अकालवृद्धतां मृत्युं च भजन्ते। अस्तु, राज्येन एतदर्थ "हाइजीन इंस्टीट्यूट" नाम्नी आहारेषु पुष्टिकरतत्त्वान्वेषणार्थमथच नवीनपौष्टिकाहारमन्त्रणार्थं च संस्था संस्थापिता। एतेषां तत्त्वानामुचिताहाराणां च सम्बन्धीनिज्ञेयान्यनयैव संस्थया जनेषु ज्ञाप्यन्ते। श्रेष्ठानामौषधीनां वितरणाय, खाद्यपदार्थेष्ववाञ्छनीयमिश्रणवारणाय च औषध्यधिनियमः १९४०, एवं खाद्यमिश्रण निरोध्यधिनियमः १९५४, प्रणीतः।

संततिनिग्रहः

अस्माकं राष्ट्रे यदैन्यस्य अविवेचित संतानोत्पत्तिः तत्पोषणे मूलसाधनानामभावश्च प्रमुखं कारणम्। जनसंख्यायाः, अनियंत्रितवृद्धिनिरोधनमतीवावश्यकम्। यदि वयं शिशूनां पोषणेऽसमर्थास्तेभ्यो विकासमुविधादाने चासमर्थास्तथा कथं तेषामुत्पादनेऽस्माकमधिकारः। एतदर्थमौपचारिकशिक्षोपलब्धये राज्यशासनेन "भारतीयरेडक्रासस्य प्रादेशिक शाखाभ्यः जे० के० इंस्टीट्यूट आफ सोशियालोजी" संस्थया सह च प्रबन्धो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विहितः। अन्येष्वपि राज्यचिकित्सालयेषु, प्रबन्धोऽयमस्ति। विभिन्नानि केन्द्राण्यप्यारब्धानि यत्र छात्रेभ्यो विशिष्टज्ञानोपलब्धये आर्थिकं साहय्यमपि सुलभम्।

संक्रामकरोग नियन्त्रणम्

जलवायुविभिन्नतया, निर्धनतया, भौतिकसाधनानामभावेन च देशेऽस्माकं संक्रामकाः रोगाः महामार्यश्च प्रायः प्रसरन्ति। ऐतेषु कुष्ठ, क्षय, रतिज, मलेरिया, फाइलेरिया प्रभृतयः प्रमुखाः।

क्षयः—स्वातन्त्र्यदिवसादद्यावधि रोगस्यास्यनिरोधे राज्यशासनः सततप्रयत्नपरोऽभूत्। तेषु बी० सी० जी० टीकोपलब्धकानां नियुक्तिः, प्रदेशस्य तत्र तत्र चिकित्सालयेषु शय्यानां सुप्रबन्धः वर्तमान, भुवाली गेठियाप्रभृतिस्वास्थ्यकेन्द्रेषु शय्या वर्धनं चिकित्सार्थं प्रबन्ध वर्धनम् च प्रमुखम्। अत्र शिक्षकेभ्यः छात्रेभ्योऽपि विशिष्ट संरक्षित स्थानमस्ति। क्षयरोगस्योपचाराय वक्षस्थलस्य शल्यचिकित्सापि विकास्यते।

कुष्ठम्:—राज्ये साम्प्रतमष्टादशसंख्यकाः संस्थाः कुष्ठरोग चिकित्सां कुर्वन्ति। एतदर्थं राजकीया तिरिक्तसंस्थाभ्योऽपि पञ्चविंशतिसहस्रोत्तर लक्षद्वयम् मुद्राः, अनुदीयते राज्येन। आसु संस्थासु सप्तत्यधिक त्रयोदश संख्यकानां रोगिणां चिकित्सा भवति।

रतिजरोगाः—रतिजव्याधयः पर्वतीयक्षेत्रेषु विशेषतः देहरादून मण्डलान्तर्गतजौनसार बावर क्षेत्रे प्रभूततरमधिष्ठिताः। एतेषां प्रभावः केवलं संक्रान्तजने एव न नियतः किन्तुतेषां भाविसन्तति चाभिकरोति। समूलमुत्पाटनीयाः, अतएवैते। एतदर्थं जनशासनेन राज्यान्तर्गतेषु सर्वेष्वपि चिकित्सालयेषु रतिजरोगाणामुन्मूलनाय प्रबन्धो विहितः। प्रदेशस्य प्रमुख नगर द्वये तु विशेषः प्रबन्धोऽभ्यधायि।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मलेरिया विषमज्वरोवा—उत्तर प्रदेशे सर्वाधिकव्यापकः जनस्वास्थस्य परमरिपुरयम् मलेरिया। अस्यनिरोधाय राज्येन द्विपञ्चाशदधिकेकोनविंशतिरिवस्ताब्द व्यापक मलेरिया निरोधिका योजना प्रारब्धा। एषा च विंशतिमण्डलेषु विभक्ता स्थायिरूपेण, प्रचलति। अस्याः योजनायाः, अन्तर्गताः "पञ्चराष्ट्रीय मलेरियानियन्त्रण कार्यक्रमाः" केन्द्रशासनेन संचालिताः। फलतः सप्तमण्डलानांजनाः लाभान्विता रभूवन्। अस्मिन् वर्षे तु त्रीण्यधिकानि केन्द्राणि पर्वतीयप्रान्ते तदधः प्रान्ते च संस्थापितानि।

फाइलेरिया—पूर्वीय प्रान्तेषु स्वास्थ्य समस्या विशेषेण विचारार्हा, गतवर्षे एतदर्थमेकंनियन्त्रणकेन्द्रं त्रीणि सर्वेक्षण केन्द्राणि क्रमशः बस्ती, बलिया, जौनपुर, आजमगढ़ नामकेषु मण्डलेषु संस्थापितानि। अपरेऽपि द्वे केन्द्रे सद्यः स्थापिते भविष्यतः। द्वे नियन्त्रणकेन्द्रेच सद्य एव समुद्घाटयिष्येते। किंच तत्सम्बन्धिनां कीटाणुनाशकौषधि क्षेपकयन्त्राणां दूरवीक्षणयन्त्राणां च व्यवस्था कृता।

महामार्याः—महामारीणां निरोधायानेकानंकयोजना विहिताः विस्तृताश्च सन्ति प्रतिवर्षम्। परिणामस्वरूपम् महामारीप्रकोपः, उल्लेखनीयां न्यूनतां प्राप्तः। १९५५ ईस्वीये विसूचिकायः १४,४१,९५४ टीकाः प्रयोगीकृताः। प्लेगस्य च ६३,११२ टीकाः प्रयोगीकृताः। विषयेऽस्मिन् ग्रामपञ्चायतस्य सेवकवर्गः राष्ट्रीय सेवा वर्गश्च, उल्लेखयोग्यां प्रशंसामर्हति।

सामान्य चिकित्साव्यवस्था—सामान्यरोगाणां चिकित्सार्थं सांप्रतमुत्तरप्रदेशे १३,५०० शय्यानां प्रबन्धोऽस्ति। परमेतन्न पर्याप्तम्। द्वितीय पञ्चवार्षिकी योजनायाम् प्रतिवर्षमष्टशतानां संख्याक्रमेण समेधिष्यते। अपराणां ४,२२४ शय्यानां प्रबन्धः, आवश्यकः। यथासंभवं जनानामावाससमीपे एव चिकित्सासौविध्यं कर्तुं राज्यं प्रयत्नन्नशीलम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अधुना राज्ये ९९० चिकित्सालयाः सन्ति। येषु त्रयोविंशत्युत्तर चतुःशतसंख्यका-एलोपैथिकाः अपराश्च, ५६७ आयुर्वैदिकाः यवनान्यश्च प्रभवन्ति द्वितीय योजनायां पञ्चाशदायुर्वैदिक यवनान्यश्च, पञ्चविंशत्युत्तर शतद्वय चिकित्सालयाः, ऐलोपैथिकस्य समुद्घाटिताः, भविष्यन्ति। प्रतिचिकित्सालये, आधुनिकतमा साजसज्जाः औषधि प्रबन्धाश्च विशेषेण क्रियन्ते।

राज्ये विशेष शल्यचिकित्सायाः, नेत्र कर्णनासिकादीनां च चिकित्सायाः प्रबन्धोऽद्यावधि केवल लक्ष्मणपुर्यामथवा आगरामेडिकलकालेज सम्बद्धेषु चिकित्सालयेषूपलब्धोऽभूत्। गतानन्तरवर्षे लक्ष्मणपुर्याम् गान्धी स्मारकसम्बद्ध चिकित्सालये एकं नेत्ररोगनिदानभवनमेको बालचिकित्सालयश्च निर्मितोऽभूत् अधुना आगरास्थित सरोजनीनायडू चिकित्सालये एकमाधुनिकतमम् शल्यचिकित्साभवनं निर्मीयते। प्रमुखेषु नगरेषु सामान्यरोगचिकित्साव्यवस्था विशेषेण क्रियते। पञ्चदशसु चिकित्सालयेषु, अनुसंधानशालाव्यवस्थाऽपिकृता। यत्र रोगनिदानान्वेषणकार्यं भविष्यति। अपि च काश्चित् विशेषयोजना अपि कार्यान्विताः क्रियन्ते यथा—नेत्र, बालसंक्रम, पाण्डु, पाठशालीयस्वास्थ्यसेवा, मनोवैज्ञानिक चिकित्सा, कैंसर, मानसिकचिकित्सा, प्रसूता-शिशुकल्याणादि योजनाः श्रमिक योजना, पर्वतीययोजनादयः।

एतत्सम्बन्धि शिक्षा प्रशिक्षणं च—अन्य प्रान्तेष्विवोत्तर प्रदेशेऽपि चिकित्सकानां-शुश्रूषकानां च बहुशोऽभाव आसीत्। अद्यावधि केवलं द्वौ मेडिकल शिक्षालयौ, उत्तर प्रदेशे, आस्ताम्। अनयोः प्रतिवर्षम् केवल छात्राणां शतद्वयस्यैव प्रवेशस्थितिः आसीत्। किन्तु प्रदेशस्यावश्यकता संम्मुखे एषा नगण्या एव। अतएव १९५५-५६ ईस्वीये कानपुर नगरे एकस्य नूतन शिक्षालयस्य व्यवस्था कृता। अपि च स्वास्थ्यनिरीक्षकाणां, शुश्रूषकाणां स्वच्छतानिरीक्षकाणां नर्स मिडवाइफकम्पाउन्डर प्रभृतीनां च प्रशिक्षणाय कतिपयानि केन्द्राणि संचालितानि।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दैशिक पद्धतयः होम्योपैथिकाश्च—राज्यशासनः ऐलोपैथिकचिकित्सा सहैवायुर्वेदिकयवनानी–होम्योपैथिकपद्धतिरपि प्रोत्साह्यति । आयुर्वेदिक-यवनानी चिकित्सालयाश्चोरोत्तरमेधन्ते । आयुर्वेदिक छात्राणामध्ययनाय लक्ष्मणपुर्यामेको राजकीयायुर्वेदमहाविद्यालयः प्रस्थापितः । तत्र अपरेऽपि विद्यालयाः सन्ति, येष्वायुर्वेद, यवनानी पद्धती नामध्यापनं भवति । प्रशिक्षण पद्धतेरुन्नत्यै तदीयछात्रेभ्यो राज्यादार्थिक साहाय्यमपि लभ्यते । योग्यतमाश्छात्रा विशेषशिक्षांगृहीतुं वहिर्देशेष्वपि प्रेषिष्यन्ते । होम्योपैथिकचिकित्सासमिति ना विंशति चिकित्सालयाः प्रस्थापिताः ।

अद्यावधि स्वास्थ्यचिकित्सोन्नत्यै यानि कार्याण्यभूवन् तानि निस्सन्देहमस्माकमुत्तरोत्तरं प्रगतिमार्गं सूचयन्ति ।

हरिजन कल्याणम्

प्राचीन वर्णाश्रम धर्मस्य सुव्यवस्थोपयोगिता च सर्वेभ्यः एव स्वीकृता । इमामनुसृत्य समुदायस्य सर्वाण्यप्यङ्गानि संयुज्य कार्याण्यकुर्वन् । तत्र बन्धुत्वभावना पारस्परिकं प्रेम चासीत् न च कश्चित्कस्मादपि घृणामकरोत् । निश्चितानि स्वस्वकार्याणि कुर्वन्तस्ते विशालमानवपरिवारस्य प्रपूरकाः अंशा इवासन् ।

गते काले शनैः-शनैः व्यवस्थायारुद्देश्यस्तु विस्मृतः लोकेन । समाजस्य विभिन्नवर्गेषूत्कृष्टापकृष्टयोः भेदः समजनि । उत्तरोत्तरे चायं दोषः समवर्धत् । अपिचायं कुविचारः घुण इवाशेषं समाजं निःसत्वमकरोत् । नष्टं च वर्णव्यवस्थायाः सौन्दर्यम्, भारतीय सभ्यतायाः स्वर्णिमातीतस्य । या सुशोभना रीतिः कस्मिंश्चित् काले वरदानइवासीद्, सैव कालान्तरे, अभिशापं परिणता ।

आर्यावर्तजनेषु हरिजनानां संख्या तु विंशति प्रतिशतादप्यधिका, तदतिरिक्तापराः पतितजातयः कृषकाश्च बहुसंख्यकाः । आसा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

माभ्युत्थानाय जनप्रियैः राज्यशासकैः, आस्वातन्त्र्यात्-सर्वाङ्गीणः प्रयत्नोऽकारि । विषयेऽस्मिन् सन्त्युल्लेखनीयानिकार्याणि ।

शिक्षा

अस्माकं संविधानः केवलं (जातिवर्गविहीनं) भारतीयसमाजं प्रत्यक्षीकरोति । यत्सम्मुखे सर्वे एव नागरिकाः समानभाजः भवेयुः, समुन्नत्यै तेभ्यः समानावसरोऽपि लप्स्यते। चिरन्तनादुत्पीडितानां समाजाङ्गनामुत्थानार्थं त्वस्पेक्षितः सुमहान्प्रयत्नः येनान्यसमाजाङ्गैः सहोत्पन्ना तेषां स्थितेः विषमता समूला नश्येत् ।

अस्तीदमतीव सुस्पष्टमेव यत् सरस्वतेः कोपभाजनस्य निम्न वर्गस्याभ्युत्थानाय या काचित् योजना विधीयते तस्यां स्वाभाविकी सर्वाधिका प्राथमिकता शिक्षैव लप्स्यते । अतः शिक्षामेव मूलाधारं मत्वा हरिजनोत्थानकार्याणि प्रारब्धानि ।

इदानीं हरिजनछात्राः भेदभावं विनेव सर्वेषु शिक्षणालयेष्वगृह्यन्ते । निम्नजातीयकेभ्योऽनुसूचितछात्रेभ्यश्च प्राथमिकी कक्षामारभ्योच्चतमकक्षापर्यन्तं निःशुल्कं शिक्षा प्रदीयते । षष्णामेक स्यानुपातेन च राज्यस्य सर्वासु शिक्षणसंस्था सु हरिजनछात्रेभ्यः स्थानानि सुरक्षितानि सन्ति ।

हरिजनछात्रेभ्यो निःशुल्कशिक्षातिरिक्ता छात्रवृत्तिव्यवस्थाप्युदारतया विहिता । आप्रारम्भिकीशिक्षया विश्वविद्यालयपर्यन्तम् साधैकरुप्यकाच्चत्वारिंशत्पर्यन्तम् मासिक छात्रवृत्तयो दीयन्ते । अस्यां दिशि १९५५–५६ ईस्वीय संवत्सरे लक्षाणांद्व्यधिकपञ्चाशत् व्ययोऽभूत् ।

प्राविधिकव्यावसायिकशिक्षासंस्थासु च हरिजनछात्रैः विविधासुविधाः समुपलब्धाः सन्ति । वर्षेऽस्मिन् डिग्रीकक्षासु पोस्ट ग्रेजुएट कक्षासु च हरिजन छात्राणां त्रयस्त्रिंशदधिकशतोत्तरसहस्रद्वयम् (२१३३) मधीते,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यदा १९४७ ईस्वीये तेषां संख्या शतमेवासीत् । समुद्घाटिताश्चसन्ति रात्रिपाठशालाः दिवसे जीविकोपार्जनसंलग्नानामशिक्षितानामध्ययनाय ।

हरिजनछात्राणां छात्रावाससम्बन्धिकाठिन्यं दूरी कर्तुं राज्येन विभिन्न स्थानेषु नवसप्ततिश्छात्रावासगृहाणि स्थापितानि । यत्रान्तेवासिनां कृते भृत्यानां निःशुल्कावासस्य च व्यवस्था वर्तते । अस्यां चतुर्लक्षाधिकं वार्षिको व्ययो भवति ।

आर्थिको विकासः

प्ररिगणितानां तथाकथितान्त्यजानां च विकासे राज्यशासनेन विशेषेण प्रयत्नयते। अपि च तेषामुन्नत्यै एकं चतुर्सूत्रीकार्यक्रममपि स्थिरीकृतम् । अस्मिन् प्रमुखास्तु निम्नोल्लिखिताः—

१—प्राविधिकव्यावसायिकशिक्षायै प्रोत्साहनम्

२—कुटीरोद्योगः हस्तकलाविकासश्च

३—भूमिरहितानां पुनर्वासः

४—आजीविका प्रबन्धः

अन्याः सुविधाः

उक्तचारसूत्रीकार्यक्रमादतिरिक्तम् तेभ्यो विशेषाः सुविधा अपि प्रदत्ताः सन्ति । अस्याः द्वितीययोजनान्तर्गतानि निम्नलिखितानि कार्याणिः—

(१) हरिजनानां बहुसंख्यकेषु ग्रामेषु कूपनिर्माणम् प्राचीनानां ध्वंसावशेष कूपानामुद्धारश्च ।

(२) गृहविहीन हरिजनानां गृहनिर्माणम्, ध्वंसावशेष भवनानां पुनरुद्धारः ।

(३) अग्निदाह-जलप्रवाहादि प्राकृतिक प्रकोप परिणामस्वरूप गृहविहीनहरिजनेभ्योनिवास व्यवस्था ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(४) हरिजनग्रामटिका (बस्ती) निर्माणम्,

(५) हरिजनग्रामटिकासु स्वास्थ्यस्य, स्वच्छतायाः स्नानागाराणां च प्रबन्धः।

एषां कार्याणां पूर्तयेऽनुदानं दीयते। अपरञ्च तेभ्यो विविधाः सामाजिकाः धार्मिकाश्च सुविधा रुपलब्धा सन्ति।

निर्घोषितापराधि वर्गाणि

एकोनविंशतिशताब्द्यारम्भेऽखिलोत्तरभारते एका विशेष प्रकारस्य वञ्चकता प्रसृता तदा 'क्रिमिनल ट्राइब्स एक्ट' नामधेयोऽधिनियमः पारित आसीत्। किन्त्विदानीमेषासीत् प्राचीनकथा उपयोग हीना च। स्वतन्त्रतोपलब्धेः पचादिदमनुभवी कृतं शासनेन यदयमधिनियमः न केवलं कठोरोऽपितु अमानवीयोऽपि। अतः उपरोक्ताधिनियमः शासनेन प्रवारितः किन्तु वारणेन सहैव तेषां पुनरावासस्य समस्या स्वभावत एवोत्थिता। तस्या निराकरणार्थं तेषांकृते विविध उन्नयनजनावासाः स्थापिताः। एवं च यत्र-यत्र कृषियोग्याभूमिः सुलभा तत्र-तत्र-तेषां पुनर्वास व्यवस्था क्रियते। येभ्यरुन्नयनजनावासनिवासिभ्यो निःशुल्कशिक्षा, चिकित्सा वासस्य च सुविधा दीयते। प्रत्येकोन्नयनजनावासेन सह शिक्षालयः, औषधालयो यन्त्रालयश्च व्यवस्थाप्यते। यथासम्भवम् नियमितरूपेण तेभ्यो जीविकादानाय प्रबन्धः क्रियते राज्येन छात्रेभ्यः पाठ्यपुस्तकानि लेखनी लिखितुं पत्राण्यादि मूल्यं विनैव दीयन्ते। जनावासानामन्तः, वहिर्वा अध्येत्रिणाम् छात्राणां छात्रावाससुविधा छात्रवृत्तिसुविधा चास्ति।

कुत्र कुत्रचित् राज्येण पृथकछात्रावासाश्च तेषामर्थं निर्मिताः। एषु छात्रावासेषु शिशवः स्व पितृभ्यां पृथकावासिताः सन्ति येन भूतपूर्वापराधशीलवर्गाणां पैतृकदोषाः तेषु नागच्छेयुः। अथ च ते निर्मले शिष्टवातावरणेच वृद्धिं प्राप्नुयुः, हि शिशवो भाविराष्ट्रस्य कर्णधाराः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जलप्लावन नियंत्रणम्

प्रायः प्रतिवर्षमेवोत्तरप्रदेशस्य कोऽपि न कोऽपि भूभागोऽतिवृष्टेः कोपभाजनतां प्राप्नोति। १९५५ ईस्वीय संवत्सरेऽतिवर्षया जलप्लावनेन च राज्ये प्रलयंकराणि दृश्याणि समुपस्थितीकृतानि। अनयातिवृष्ट्या सहस्रेषु योजनेषु भूमिः जलमज्जिता शतसहस्र जनाः गृहविहीनाः कृताः, अनर्घा क्षतिः जनधनस्यस्य चाकारि। अतिवृष्टिग्रस्तजनस्य मानसिक-यंत्रणायाः दुर्विपाकानां चाननुमानमेव वरम्।

अस्या वार्षिकापत्तेः नियंत्रणार्थं राज्येन मवरोधयोजना निर्मिता यदनुसारं १९५४ ईस्वीये पयः पूरनियंत्रणसमितेः स्थापना कृता, या पयः-पूरनियंत्रणकार्याणां व्यवस्था करोति। अद्यावधि यावत्यो योजना स्थिता-स्तासां ग्रामावासस्तरस्य उत्थापनं, वाराणस्याः जलौघात् रक्षा च, प्रमुखे। लक्षाणां त्रयस्य कार्याणिपूर्तिमगुः यया १२०० ग्रामाणां, पञ्चलनैकड़ भूमीनां च रक्षा संभाविता। अद्यापिविषयेस्मिन्न नवद्यं कार्यंभवति। द्वितीय पंचवार्षिकी योजनायां कतिपयमहत्वपूर्णकुल्यानामपि (नहरें) पयः पूरेण रक्षणार्थं व्यवस्था कृता। अधोलिखितं विवरणं तासां योजनानामस्ति, यासां कार्याणि पूरितानि पूर्यमाणानि अथवा १९५७ पर्यन्तम् पूरयिष्य-माणानि वा सन्ति।

गाजीपुरे-घोसालपुर बन्धः पुलियां, गोविन्दपुर, मुस्तफाबाद खत्ती, पृथ्वीपुरबन्धश्च।

बलियामण्डले—बलिया बरियाबन्धः गंगातटवासि ग्रामरक्षा-घाघरानदीतटवास्तव्यग्रामाणां रक्षा बकुलहा संसारटोलाबन्धस्तुर्तीपुर श्रीनगर बन्धश्च।

आजमगढ़मण्डले—हाहानालाबन्धः, घाघरानद्यारक्षणम्, अल्पा-नुमानितकुल्यकाः, महोलागरवालबन्धश्च।

देवरिया—छितौनीबन्धः, पुलिकाभ्यो जलनिर्गमन विस्तारा, जलमग्नग्रामाणामुत्थापनम्, छितौनी उत्तर, छितौनी दक्षिण बन्धश्च।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गोरखपुर—चतस्रः कुल्यकाः, पुलिकाभ्यो जलनिर्गमनम्, माधोपुर बन्धः, जलमग्नग्रामानामुत्थापनम् । आधानपारा स्थानात् बनकट-पर्यन्तम्, 'कुआनो' नद्योपरि बन्धनिर्माणम्, मलान बन्धः मझौलिया बंधश्च ।

वाराणस्याम्—पुलिका निर्माणम्, अल्पानुमानित कुल्यकाः, प्रसिद्धघट्टेषु पयःपूरनियंत्रणकार्यम्, गंगानद्याः वरुणा नद्यामरावर्तित जलानामोघेन रक्षा ।

वस्ती—जलमग्नग्रामानामुत्थानम्, घाघरायाः उत्तरस्यां दिशि पारसपुर घरौरा बन्धः ।

बहराइच बाराही या क्षेत्रमण्डले—बेलहा बेहरा बन्धः, बोदी-बहरोली बन्धः, बेहेरा-बोरी बन्धः, घाघरातटस्थग्रामाणांरक्षा च ।

नैनीतालमण्डले—बाजपुरसमीपस्थंकोशी नद्या उपरि बन्ध विस्तारः

गोंडा—घाघराया उत्तर तटे पारसपुर घरौरा बन्धः ।

देहरादून—सोंग-सुसवा च नद्योरुभयोस्तटयोः पयः पूरनियंत्रण कार्यम् ।

सहारनपुर—नागदेवराव नद्याः पयःपूरनियंत्रण कार्यम् ।

रामपुर—कोसी नद्याः वामतटे जोलपुर बन्धः ।

अपि च योजनया फैजाबाद, सुल्तानपुर, प्रतापगढ़, जौनपुर, आजमगढ़, गोंडा, गोरक्षपुर, देवरिया, इलाहाबाद, बस्ती, रायबरेली, वाराणसी, बहराइच, बाराबंकी, सीतापुर, लखीमपुर, गाजीपुर, मण्डलेषु च २,५०० पयःपूरग्रसितानां ग्रामाणामुत्थापन कार्यं क्रियते ।

इमानि निर्माणकार्याणि सरलानि सुलभानि च विधातुं नूतनानि साधनान्यन्वेष्यन्ते । एतदर्थं रुड़की-अनुसन्धानशालायाः विकासः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्रियते । अपि चास्याः अनुसंधानशालायाः, हाइड्रोलिक्स, स्वायल, ग्राउन्डवाटर मेटीरियल टेस्टिंग एवं स्टैटिस्टिक्स विभागाःनूतनतमयन्त्रै-रिलंक्रियन्ते । अयम् विभागः प्रान्तस्य विभिन्न भागेषु, परीक्षणानुसन्धानयोः कार्यं करोति । तां

एषांप्रगतिः सन्तोषप्रदा ।

साम्प्रतम्, उत्तरप्रदेशीयसार्वजनिकनिर्माणविभागस्याधिकारे २०७२० मील पर्यन्तं पक्वमार्गाः सन्ति । यत्र हि १९४७ ईस्वीये प्रायशः (५०००) पञ्चसहस्रमीलपर्यन्तमेवैतेषां विस्तार आसीत् । अपि च राज्ये १५०३ मीलपर्यन्तविस्तृता राष्ट्रीयमार्गाः सन्ति येषां निरीक्षणं प्रबन्धश्च केन्द्रीयराज्येन क्रियते ।

द्वितीय पञ्चवर्षीययोजनायांनूतनराजमार्गनिर्माणलक्ष्यं तामे-वयोजनामनुसृत्य निर्धारितम्, या प्राङ्नागपुरे निश्चिताभूत्तल्लक्ष्य-पूर्तये राज्येन द्वितीयपञ्चवार्षिकीयोजनायाम्, १६,१३,७५,००० रुप्यकाणां व्ययेन १४,२०० मील मार्गनिर्माणस्य योजना निश्चिता ।

पुलिकाः—राजमार्गयातायाते पुलिकानांस्थानंमहत्वपूर्णम् । वर्षाकाले ताः राजमार्गान् परस्परं सम्बन्धयन्तिः विषयेऽस्मिन् राज्येन प्रशंसनीयः प्रयासः कृतः । प्रथमपञ्चवार्षिकीयोजनायां १२.१२ लक्ष रुप्यकव्ययेन नव पुलिकानांनिर्माणस्य योजनासीत् किन्तु योजनावध्यास्येव पञ्चनवति लक्षाणां व्ययेन (९५ लाख) षड्विंशति वृहद् पुलिकानां निर्माणं कृतम् । पुलिकासु च वेगुल-भाखणनद्योः पुलिका, मेरठ-बरेली राजमार्गस्थित पुलिका, लघुगण्डकी पुलिका, उट्टंगन पुलिका, कर्मनाशा पुलिका, उल्लेखयोग्याः सन्ति । अपि च द्वाविंशत् पुलिकासु कार्यं प्रचलति । द्वितीय पञ्चवार्षिकीयोजनायाम् १५० पुलिकानां निर्माणाय लक्ष्यं निर्धारितम् । स्वेच्छाश्रमदानेन च अनेकेषां राजमार्गाणां नलिकानां पुलिकानां च निर्मितिरभूत । येषां मूल्यांकनं यदि कृतं स्यात्, तर्हि कोटिशो रुप्यकाः भवन्तु राजकीययन्त्रशकटिकाः (मोटर बसें) । जनस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुस्तकालय

गमनागमन सरलं सुखदं च कर्तुं राज्येन १९४७ ईस्वीयतः राजमार्गयातायातस्य राष्ट्रीयकरणं कर्तुमारब्धम्। अनेन कारणेन न केवलं यातायातसौविध्यं प्राप्त; मपि तु राज्यस्यार्थिकविकासोऽपि प्रौढ़त्वमगमत्। सहस्रेभ्यो जनेभ्यो जीविकापि लब्धा। राजमार्गयातायातस्य प्रारम्भः १९४७ मई मासतः समारब्धः। तदास्माकं यन्त्रशकटानां संख्या ५११ एव आसीत्। किन्त्वद्य ३३७ राजमार्गेषु ६,७०० मील विस्तृतेषु १५८४ यन्त्रशकटानि १४३ यन्त्रभारवाहनानि ४८ पर्यटकयन्त्रशकटानि जनतायाः यात्रां सरलां सुखदां सुव्यवस्थितां च विधातुं संलग्नानि सन्ति।

यातायातः

कस्यापि राष्ट्रस्यार्थिकविकासाय सपद्यौद्योगीकरणाय वा यातायातसाधनानां विकासोऽतीवावश्यकः। एतच्चान्यसमृद्धदेशेषु दृष्टि निक्षेपणेन सुस्पष्टतरं भवति। सर्वैरेवोन्नतिशील राष्ट्रैः स्ववत्मनिर्माण योजनासु यातायातसाधनेभ्यो विशेषतया राजमार्गनिर्माणायातिमहत्वं दीयते। समुचित यातायातसाधनानामभावे उत्पादक वस्तूनामुत्पादित वस्तूनां च स्थानान्तरणमतीवकष्टकरमसुलभं च। अपि चैतानि वस्तूनि याव्दुपभोक्तृणांलभन्ते तावत् स्थानान्तरण प्रक्रिया मेव महार्घाणि संजायन्ते। यातायातसुविधायाः असौलभ्ये गमनागमनयोः, अवरोधो भवति। फलस्वरूपं दृष्टिकोणस्य संकोचः स्वाभाविकः। वस्तुतस्तु यातायातसाधन विस्तारेण सहैव वयं स्वसभ्यतामपिविस्तारयामः।

सुविपुलेऽस्मिन् देशे अधिकांशजनाः ग्रामेष्वेववसन्ति। स्वतन्त्रतायाः प्राक् ग्रामेषु यातायात सुविधानाम् भाव एव आसीत्। वर्षाकाले च बहुषस्थानेषु गमनमसम्भवमेवा भूत। वैदिशिकशासनस्तु तेषामेव राजमार्गाणां निर्माणे अनुरक्तमभूत् येषां सैनिक दृष्ट्या प्रशासन दृष्ट्यावोपयोगितासीत्। अतएव देशस्यविशालभागेषु नवसभ्यतायाः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समुन्नतेश्च प्रवेशोऽपि नाजायत । स्वतंत्रतानन्तरं संचालितानां विकास कार्याणां साफल्यं सुगमोन्नत यातायातसाधनेषु, आश्रितमतिष्ठत् ।

राजपन्थाः—उत्तरप्रदेशस्य जनप्रियैः, राज्यशासकैःगृहीते शासने सति विशेषेण नूतनराजमार्गाणांपुलिकानां च निर्माणमथ च प्राचीनराजमार्गाणांपुलिकानां समुद्धारश्च कृतः । १९४३ ईस्वीये निःशेष देशवासिनां प्रधानशिल्पिनां (चीफ इंजीनियर) सम्मेलनेन संस्कृतराजमार्गाणां विषये एकः सिद्धान्तो निश्चितः । एतच्छिद्धान्तानुसारेण पक्वापक्वराजमार्गाणामावश्यकत्वं निश्चितीकृतम् । इदं च लक्ष्यं त्रिषु चरणेषु, विंशति वर्षेषु पूर्तिं गमिष्यति । सांप्रतं राज्येन योजनानुरूपं प्रथम-चरणस्य कार्यं प्रारब्धम् । अस्यां मार्गनिर्माणार्थं ७,८३,१०,००० रुप्यकाणां व्यवस्थासीत् । यत्र च प्रायशः चतुर्दशलक्षोत्तर कोटीनां षट्कस्य व्ययो जातः । अद्यपर्यंतं कतिपय स्थानेषु निर्धारितलक्ष्यापेक्षयाप्यधिकं कार्यमभूत् ।

जनोपयोगिविधानानि

महायुद्धानन्तरं १९४६ ईस्वीये, उत्तरप्रदेशे पुनरपि जनप्रिय मंत्रिमंडलस्य स्थापनाभूत् । लोकशासने राजसत्तानिहिते सति तेन विविधानि, एतादृशानि विधानानि विधत्तानि येषां जनसाधारणाय महन्महत्वम् ।

१५ अगस्त १९४७ ईस्वीये राष्ट्रमिदं स्वतंत्रंजातमृतावत्पर्यन्तं १९३५ ईस्वीये भारतीय शासनविधानाधीन विधानमण्डलेन कार्यमकारि । १९४७ ईस्वीयानन्तरं भारतीय स्वातन्त्र्यविधान धारामनुसृत्य कार्यमारब्धम् । तदाप्रभृति तदनुरूपमेव कार्यं भवति ।

१९४६ ईस्वीयतः १९५५ ईस्वीय ३१ मई पर्यन्तं विधानमण्डलेन २७४ विधानानि विहितानि । जमींदारीप्रथोन्मूलन-भूमिसुधार-पञ्चायत राज्य-शुद्ध खाद्य-सामाजिकयोग्यतानिवारण-बालसहायतादि सम्बन्धीनि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विधानानि जीवनसम्बन्धिनां वस्तूनामुत्पादन वितरण, मूल्यनियंत्रण, श्रम-कल्याण, परिवहन, यातायात, विद्युद्नियंत्रण, शान्ति व्यवस्थादीनां च सम्बन्धीन्यनेकानि विधानानि विहितानि राज्येन। येषु राष्ट्रजनस्य व्यापकहितानां सुबहुशः ध्यातमस्ति।

स्वतंत्रतोपलब्धेः प्रागपि जमीन्दारीप्रथायाः कुप्रभावेण कृषकाणां रक्षणे तेभ्यः साहाय्यदाने चानेकैर्विघ्नैः प्रति हन्यमानेनपि प्रथम लोक-प्रियमंत्रिमण्डलेन तेषां यथासंभवमधिकाधिकहितसंपादनेऽनवरतं-प्रयत्नोकृतम्। अनेनैवोद्देशेन तेन कृषकीय विधानम् (टेनेंसी ऐक्ट) व्यरचि। परन्तु तस्मिन्नेव वर्षे द्वितीयो महायुद्धः प्रारब्धः। फलतः मन्त्रिमण्डलेन पदमत्याजि। पश्चाद्देशेराज्यपालीय शासनप्रचलनवशान्नाय-मुद्देशः पूर्तिमगात्।

अतएव १९४६ ईस्वीये यदैव मंत्रिमंडलेन पुनः पदग्रहणं कृतम् तेन कृषकाणां तात्कालिकीं संकटावस्थादृष्टा। अधिकांश कृषकेष्वा-सीत् सुमहान्नसन्तोषः यतो न्यायालयैः—"हक-आराजी विधानस्य" आवश्य-कतोधिको दार व्याख्यया ते स्वक्षेत्रेभ्योऽपि वञ्चिताःभवन्। मंत्रिमण्डलेन तत्कालमेव सम्बन्धितधाराणां परीक्षणं कृतम्, अथच यू० पी० टेनेंसी संशोधनाधिनियमः १९४६ ई० पारितः। अस्य विधानस्योद्देश एतावत् कालपर्यन्तम् कृषकाणां या क्षतिरभूत्तस्याः निराकरणमासीत्। पश्चाद्यथा यथा विधाने न्यूनतापरिचयोऽनुभूतस्तथा तथा संशोधितम्। सदैव कृषकाणामन्यहितानामपि सुरक्षार्थं यतितम् मन्त्रिमण्डलेन। एतदर्थं 'यू० पी० टेनेंसी' अधिनियमौ १९४७–१९४८ पारितौ।

अन्ततोगत्वा जमींदारी प्रथापरिसमाप्त्यर्थं या समितिर्नियुक्ता तस्यां विभिन्नविचारशीलाः सदस्याः नियोजिताः। १९४८ ई० जुलायमासे विधानसभायां जमींदारी विनाश भूमि व्यवस्थाविधेयकश्चोभौ समुपस्थापितौ १९५१ ईस्वीये सर्वसम्मत्या पारितौ च। २४ जनवरी १९५१ ईस्वीये राष्ट्रपतेरपि सम्मतिः प्राप्ता।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जमींदारीविनाशभूमिव्यवस्थाविधानयोः, उल्लेखनीयानि वृत्तानि निम्नोल्लिखितानि ।

अस्यविधानस्याश्रितविज्ञप्तौ प्रकाशितायाम् सति ग्राम्यभूमीः (क्षेत्रस्थोद्यानस्थांश्च वृक्षान्, सर्वान कूपांश्च विहाय) अपरेषु सर्वेषु वृक्षेषु मीनाश्रितेषु, सरःसु, पुष्करेषु, जलप्रणालिषु, उत्तरण घट्टेषु, मार्गेषु कतिपयेषु हट्टेषु, पणसु, आकरेषु खनिजेषु च मध्यवर्तिनां यः कश्चिदधिकारोऽभवत् स समाप्तः ।

एतद्विधानानुसारेण १९५६ फसली अब्दे या भूमिः यस्याप्यधिकारे आसीत् नामोल्लिखिता वासीत् सा भूमिस्तस्यैव संजाता। नासौऽधुना केनापि तया वञ्चितुं शक्यते । १९५२ ई० जुलायमासतः पूर्वं विविधा कृषकाः प्रकाराः अभूवन् । परन्त्विदानीं केवल त्रिप्रकाराः, एवावशिष्टाः— भूमिधरः, सीरदारः आसामीनामधेयश्च ।

जमींदारीविनाशविधानस्य स्वीकृतिप्रचलनयोश्चान्तर्वर्तीयकाले कृषकाणां सुविधार्थं भूम्यधिकारसम्बन्धे विधानमण्डलेन यू० पी० राज्य (विशेषाधिकारोपार्जन), विधेयकम् पारितम् अनेन स्वदातव्यः भूमिकरस्य दशगुणितं द्रव्यं दत्वा भूमिधर-प्रमाणपत्रं प्राप्तुं कृषकैः, अवसरः प्राप्तः। यथा ते स्वाधिकृतभूमिभ्यो वञ्चिताधिकाराः न भवेयुस्तथा व्यवस्थापि कृता। भूमिधराधिकारप्राप्त्यनन्तरं तेषां करम्, पूर्वं निश्चित दातव्यकरस्यार्धमभूत् ।

ग्रामसमाजः ग्रामसभा च

येष्वेकस्तदधिकाः, वा ग्रामाः सन्ति तेषु मण्डलेषुक्षेत्रेषु वा एकोः ग्रामसमाजः स्थापितोऽस्ति। यस्य सदस्याः प्रकारत्रयस्यापि कृषकाः भवितुमर्हन्ति। ग्रामसभाभ्यश्चाधोलिखिताधिकाराः संप्राप्ताः । वृक्षाणां वनानां निवासस्थलानां च रक्षा, कृषेर्विकासस्तदुन्नतिश्च, हट्टपणमेलापकानां प्रबन्धः, सहकृतकृषिकर्मणोविकासः , पशुपालनविकासः, क्षेत्राणां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चकबन्दी, गमनागमनमार्गाणां निरीक्षणम्, कुटीरोद्योगानां विकासोऽसंस्कृत भूमेरुत्थापनमादि कार्याणि समये-समये अन्यानपि नियतीकृतानि कार्याणि पंचायतराजाधिनियमे (१९४७ ई० पारिते) ग्रामसभायाः कर्तव्यानि नियतानि ।

भूदानम्--स्वकीये भूदानान्दोलने, आचार्य विनोबाभावे, अस्माकं राज्ये समुत्साहजनिकां सफलतामवाप। भूमिहीन कृषकेभ्यो भूमिप्रदानाय भूतपूर्वभूस्वामिनः कृषकाश्च यज्ञेऽस्मिन् सहयोगं कृतवन्तः। शासनेन भूदानकार्ये काचिद्वैधानिकी कठिनतानुभूता। यथा जमींदारी-प्रथोन्मूलनभूमिसुधाराधिनियमान्तर्गतं भूमिहस्तांतरणमवैधानिकमासीत्। काठिन्यमिदं दूरीकर्तुं भूदानाधियज्ञस्य सफलतासम्पादनाय च भूदानयज्ञाधि-नियमः १९५२ पारितः।

१९४८ ईस्वीये भयंकरैः जलौघैः, उत्तर प्रदेशे बहूनां ग्रामाणां गृहाणां चाभूतपूर्वाक्षतिरभूत्। असंख्याः, जनाः गृहहीनाः, जाताः। अतएव पयः पूरेण विनष्टग्रामाणां पुनर्वासाय शासनेनेदं निश्चितं यत्र संपूर्णग्रामः ग्रामटिका वा जलौघैर्नष्टा तत्र यथासंभवं पुनर्ग्रामनिर्माणं विकसितायुनि-करीत्या करणीयम्, अथ च अव्यवस्थित गृहनिर्माणमवरोधनीयम्। इममुद्देश्यं पूरयितुं पयःपूरपीडितानां पुनर्वासाय च भूमिमधिगृहीतुं (रिक्विजीशन) हस्तगतां च कर्तुम् (acquire) रिक्वीजीशन आफ प्रापर्टी (फ्लड रिलीफ) टेम्पोरेरी पावर्स ऐक्ट १९४८ पारितम्। किन्तु पयःपूरस्य पुनरपि संभावनया पश्चात् स्थायीकृतम्।

कृषीनामुन्नतये, जलौघपीडितानां सुरक्षायै च राज्येनानेकान्यधि-नियमानि पारितानि। एषु मुख्यनियमानिनिम्नोल्लिखितानि।

उ० प्र० भूमि संरक्षणाधिनियमः १९५२, उत्तर प्रदेश कांसोन्मूल-नाधिनियमः १९५१, उ० प्र० भूमिसिंचनाधिनियमः १९५०, उत्तर प्रदे-शीयजलौघसम्बन्धिताकस्मिकाधिकाराधिनियमः, उ० प्र० राजकीयनलकूप-संशोधनाधिनियमः १९५३, कैटिलट्रेसपासाधिनियमः १९५४ इत्यादयः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृषिभूमेरसावधानतयोपयोगेन वहव्यो भूमयोऽनुर्वराः जाताः। तासां रक्षणाय समुन्नतये च विधानमण्डलेन, उ० प्र० भूमिसंरक्षणाधिनियमः पारितः।

स्थानीय निकायः—स्थानीय स्वशासनस्य व्यापक विकासाय यदा यू० पी० पंचायतराज्याधिनियमपारणस्याभूतपूर्वकार्यं सम्पन्नम् तेन सहैव डिस्ट्रिक्टबोर्डनगरपालिकासम्बन्धिताधिनियमेषु च संशोधनं कृत्वा लोकतांत्रिकशासनानुरूपमकारि। एभिः संशोधनैर्निर्वाचनप्रणाली पूर्णतया परिवर्तिता। मताधिकारे संख्यायाः वृद्धया सहैव संयुक्त निर्वाचनरीत्याधारे निर्वाचनव्यवस्था कृता। अल्पसंख्यकेभ्यः स्थान रक्षणायाध्यक्षस्यचा प्रतिहतनिर्वाचनायापि व्यवस्था कृता। मनोनीत-करणस्य प्राचीन प्रथास्थाने, इदानीं निर्वाचित सदस्याः स्वयमेव निश्चित संख्यासु सदस्याननुमोदन्ते। सहैव नूतनाधिनियमद्वारा—अनिवार्य-स्थानीयकरग्रहणाय, एतेषु वृद्धिकरणाय, एवं स्वविकासकार्येषु च जनेभ्यः ऋणं गृहीतुं मण्डल (जिला बोर्ड) समितिभ्योऽधिकारो लब्धः।

लोकहितम्

खाद्यपदार्थेषु मिश्रणवारणाय १९१२ ई० विधानस्थाने शुद्धखाद्याधिनियमः (१९५०) विनिर्मितः। अपि च खाद्यान्ना-नामन्येषां च जीवनोपयोगिवस्तूनामुत्पादन-वितरण-मूल्येषु-नियन्त्रीकरणायचानेकामऽधिनियमाः, राज्यविधानमण्डलेन पारिताः। एषु कण्ट्रोल आफ सप्लाईज (अस्थायी), कण्ट्रोल आफ रेण्ट एण्ड इविक्शन १९४७ (अस्थायी) यू० पी० इलेक्ट्रिसिटी (अस्थायी), अधिनियमाः प्रमुखाः सन्तिः। द्वितीय संशोधन द्वारा च १ जनवरी, १९५१ ईस्वीये तत्पश्चाद्वा निर्मितानि भवनानि नियंत्रणाद्विमुक्तानि।

जनस्वास्थ्यसंबन्धविधानानां विवरणं प्रागेव लिखितम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समाजसुधारः

उत्तर प्रदेशीयबालकाधिनियमः १९५१ ईस्वीये यो विहितस्तस्य सम्बन्धस्तेभिः षोडशवर्षीयैस्तन्निम्नैः वापराधिभिः सहमास्ते ये स्वापराधेन जीवनपर्यन्तदेशनिष्कासनयोग्याः कारागारयोग्याः, वा सन्ति। अस्मिन्नधिनियमे बालापराधिनामुत्तरदायित्व केनापि गृहीते सति (जमानत पर) मोक्षस्य व्यवस्था कृता। अपि च दत्ताधिकाराः न्यायालयाः एतादृशापराधिनां सुधाराय निर्धारिते कस्मिंश्चिद् विद्यालये प्रेषयितुं सर्वथा मोक्तुं वा प्रभवन्ति। किं वा 'प्रोबेशने' मुञ्चन्तु। संक्षेपे बालकापराधिष्वन्येष्वपराधिष्विव व्यवहारो न कर्तव्यः, अपितु रुग्णनिर्बलसामाजिकाङ्गानि मत्वा तान् योग्यनागरिकेषु परिवर्तितु यतेत इति विधानप्रयोजनम्।

१९४७ ईस्वीय उत्तर प्रदेशसामाजिकायोग्यतानिरोधकाधिनियमस्योद्देशः, राज्ये सामाजिकासुविधानां निवारणमासीत्। अनेन विधानेन परिगणितजातीयकेभ्योऽपि ता एवसुविधाः, लब्धा या अन्यजातीयानां सन्ति।

श्रमिकसम्बन्धीनि विधानानि, अन्यत्रोल्लिखितानि।

विविधानि

राज्यविधानमण्डले, उपस्थापयिष्यमाणविधेयकानां तस्मिन् पारितानां च विधेयकानां भाषा देवनागरी कर्तुम् 'उत्तरप्रदेशभाषाविधेयकाधिनियमः १९५० पारितः। अपि च नागरीलिप्यां लिखितां भाषां प्रदेशस्य राजभाषामुद्घोषयितुं, 'उत्तरप्रदेशराजभाषाऽधिनियमः' १९५१ पारितः।

विद्युन्नियन्त्रणम्

युद्धोत्तरकाले राज्ये विद्युदावश्यकतातीवावर्धत्। अतएव विद्युन्मूल्येषु विद्युदोत्पादकसमितीनां लाभेषु च नियन्त्रणमावश्यकमभूत्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उद्देश्यस्यास्य पूर्तये १९४७ ईस्वीये "यू० पी० इलेक्ट्रिसिटी अधिनियमः" पारितः ।

शांतिव्यवस्था

राज्यजनरक्षणार्थं शान्तिस्थापनाय च कियन्तो महत्वपूर्णाधिनियमाः निर्मिताः। १९४७ ईस्वीये देशे विशेषेणोत्तरप्रदेश प्रतिवेशिकेषुराज्येषु प्रसृतायारसुरक्षायारवलोकनेन किञ्च तत्संभावित-प्रतिक्रियानिरोधाय 'यू० पी० मेंटिनेंस आफ पब्लिक आर्डर' (अस्थायी) १९४७ पारितः। अनन्तरं सम्बन्धेऽस्मिन् सर्वोच्च न्यायालय निर्णयानामन्यराज्यनिर्णयानां चावलोकनेन विधानेऽस्मिन् संशोधनस्यावश्यकतानुभूता। अतः यू० पी० मेंटिनेंस आफ पब्लिक आर्डर (संशोधन) ऐक्ट १९४९ पारितः। अनेन विधानेन उच्चन्यायालयस्येकन्यायाधीशस्य अन्येकन्यायाधीशस्य चेका स्वतन्त्रा समितिः स्थापिता या केवलमवरुद्धानां (नजरबन्द) वन्दिनां कृते परामृशति राज्यम्। एतादृशस्यावरोधमात्रस्यावधिः षण्मासादधिकं स्थितुं न शक्नोति। तदनन्तरमभियुक्तस्याभियोगं समितेः पुरतः, उपस्थापनं राज्यस्यावश्यकर्तव्यम्। सम्बन्धेऽस्मिन् यानि-अन्यानपि विधानानि निर्मितानि तेषु १९४८ ई० अपराधनिरोधाधिनियमोत्तर प्रदेशाभ्यस्तापराधिप्रतिरोधकाधिनियमश्चोल्लेखनीयः।

न्यायविधिसुधार

न्यायविधिषु सुधारार्थं परामर्शप्रदातृ एका समिति न्यायमूर्तेः श्री बांचूमहोदयस्याध्यक्षतायां नियुक्ताभूत्। निर्णये विलम्बं, कार्यप्रणालिनां जटिलता, मनावश्यकाभियोगान्व्ययांश्चोन्मूलयितुम्, उत्तर प्रदेश सिविल लॉज (सुधार संशोधन) अधिनियमः १९५३ ई० स्वीकृतोऽभूत्। अन्यान् समित्यनुरोधांश्चं कार्यान्वितीकर्तुम्, इंडियन इविडेंस ऐक्ट १८७२, ट्रांसफर आफ प्रापर्टी ऐक्ट १८८२, प्राविंशियलस्मालकॉज कोर्ट्स ऐक्ट १८८७, बंगाल, आगरा, ऐण्ड आसाम सिविल कोर्ट्स ऐक्ट १८८७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कोड ऑफ सिविल प्रोसीजर १८०८ आदिषु विधानेषु संशोधन प्रस्तावः स्वीकृतः ।

विस्थापिताः

विभक्ते देशे लक्षेषु शरणार्थिनः उत्तर प्रदेशेऽपि समागताः । तेचानेक-विधताहाय्येन राज्यशासकैः स्वावलम्बिनः कृताः । सम्बन्धेऽस्मिन् निर्मितानि कतिपयविधानानि, उल्लेखनीयानि यथा—यू० पी० रिफ्यूजीज ऐक्ट (रजिस्ट्रेशन एण्ड मूवमेण्ट), १९४७ यू० पी० इवैकुइज (ऐडमिनिस्ट्रेशन ऑफ प्रापर्टी ऐक्ट,) १९४७, यू० पी० लैण्ड एक्वीजीशन (रिहैबिलिटेशन आफ रिफ्यूजीज), यू० पी० रिफ्यूजीज लोंस ऐक्ट, १९४८–४९ प्रमुखानि ।

एतदतिरिक्तम्, विधानमण्डलेन जनजीवनस्य विभिन्नाङ्गैः सम्बन्धि-तेषु विषयेषु विधानानि निर्मितानि । महायुद्धान्तरं वस्तूनां स्वल्पता तासामावश्यकतायाः प्रवृद्धत्वेन या चौरपिणता (चोरबाजारी) प्रवृद्धा तस्याः निवारणाय 'यू० पी० प्रिवेंशन ऑफ ब्लैकमार्केटिङ्ग (अस्थायी), पारिताः ।

अपरंच, राज्येन राष्ट्रीयत्तकृतं राजकीय यातायात कार्यक्रयमाश्रित्य राजकीय 'रोडवेज बस सर्विस' वाहनानि प्रचालितानि सम्बन्धेऽस्मिन् स्टेट रोड ट्रांस्पोर्ट ऐक्ट १९४१ पारितः ।

चलचित्रगृहेषु धूम्रपानावरोधाय-उत्तरप्रदेशधूम्रपाननिषेधाधि-नियमः १९५२ निर्मितः । अश्लील एवमापत्तिजनकानांच विज्ञापना-नामवरोधाय, 'उत्तरप्रदेशापत्तिजनक विज्ञापनाधिनियमः १९५२ निर्मितः ।

विभिन्न विषयैः सम्बन्धितेष्वन्यप्रमुखनियमेषु च, उत्तर प्रदेश पब्लिक गेम्बलिंग (द्यूत) ऐक्ट १९५२, चैरिटेबिल एन्डाउमेंट्स (उत्तर प्रदेश संशोधन) ऐक्ट १९५२ तथा उत्तर प्रदेश रक्षकदलाधिनियमानि, उल्लेखनीयानि सन्ति ।

पी० एस० यू० पी० ए० पी० २५७ जनरल (पब०)–१९५७–२०,००० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुद्रक :
अधीक्षक, राजकीय मुद्रणालय एवं लेखन सामग्री,
उत्तर प्रदेश, भारत ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri